# Chitraguptaproktam Mrityunjayamahimakhyanam

# ચિત્રગુપ્તપ્રોક્તં મૃત્યુઞ્જયમહિમાખ્યાનમ્

## Document Information

Text title : Chitraguptaproktam Mrityunjayamahimakhyanam

File name : mRRityunjayamahimAkhyAnamchitragupta.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 16 | 181.2-199||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# ચિત્રગુપ્તપ્રોક્તં મૃત્યુઞ્જયમહિમાખ્યાનમ્

ચિત્રગુપ્તઃ ઉવાચ -
સમ્પૂજ્યઃ શાઙ્કરં લિઙ્ગં બિલ્વપત્રાદિભિર્મુદા ।
સ્વર્ગાપવર્ગદાતારં શઙ્કરં યોઽર્ચયિષ્યતિઃ ॥ ૨૧૭॥

સ નો મૃત્યુવશં યાતિ કલ્પકાલેઽપ્યસંશયમ્ ।
અભીપ્સિતાર્થદં નિત્યં મહેશં યોઽર્ચયિષ્યતિઃ ॥ ૨૧૮॥

સ નો મૃત્યુવશં યાતિ કલ્પકાલેઽપ્યસંશયમ્ ।
અનન્યશરણો નિત્યં યોઽર્ચયિષ્યતિ શઙ્કરમ્ ॥ ૨૧૯॥

સ નો મૃત્યુવશં યાતિ કલ્પકાલેઽપ્યસંશયમ્ ।
મૃત્યુઞ્જયં મહારુદ્રં યોઽર્ચયિષ્યતિ શઙ્કરમ્ ॥ ૨૨૦॥

સ નો મૃત્યુવશં યાતિ કલ્પકાલેઽપ્યસંશયમ્ ।
સર્વદેવોત્તમં સામ્બં યોઽર્ચયિષ્યતિ શઙ્કરમ્ ॥ ૨૨૧॥

સ નો મૃત્યુવશં યાતિ કલ્પકાલેઽપ્યસંશયમ્ ।
મૃત્યુઞ્જયં સમભ્યર્ચ્ય બિલ્વપત્રાદિસાધનૈઃ ॥ ૨૨૨॥

કાલમૃત્યું તરન્ત્યેવ કિમ્મુતહ્યપમૃત્યવઃ ।
યત્પૂજયા પુરા વિષ્ણુર્વિષ્ણુત્વં પ્રાપ દુર્લભમ્ ॥ ૨૨૩॥

યત્પૂજયા પુરા બ્રહ્મા બ્રહ્મત્વં પ્રાપ દુર્લભમ્ ।
તદર્ચનપરઃ કોઽપિ ન મૃત્યુવશમેષ્યતિ ॥ ૨૨૪॥

યત્પૂજયા વિમુક્તિશ્ચાપ્યયત્નેનૈવ લભ્યતે ।
યત્પૂજયા વિનશ્યન્તિ ભીકરા આપદઃ ક્ષણાત્ ॥ ૨૨૫॥

તદર્ચનપરઃ કોઽપિ ન મૃત્યુવશમેષ્યતિ ।
યઃ સર્વરૂપઃ સર્વાત્મા સાક્ષી સકલકર્મણામ્ ॥ ૨૨૬॥

તદર્ચનપરઃ કોઽપિ ન મૃત્યુવશમેષ્યતિઃ ।

યઃ કાલકાલઃ કાલાત્મા કાલરૂપી સદાશિવઃ ॥ ૨૨૭॥

તદર્ચનપરઃ કોઽપિ ન મૃત્યુવશમેષ્યતિ ।
યસ્ત્રિણેત્રો વિશ્વકર્તા વિશ્વસ્ય પરિપાલકઃ ॥ ૨૨૮॥

તદર્ચનપરઃ કોઽપિ ન મૃત્યુવશમેષ્યતિઃ ।
યમર્ચયન્તિ યોગીન્દ્રાઃ સર્વદા સામ્બમીશ્વરમ્ ॥ ૨૨૯॥

તદર્ચનપરઃ કોઽપિ ન મૃત્યુવશમેષ્યતિઃ ।
સ એવ સુખમાપ્નોતિ સ એવાખિલસમ્પદઃ ॥ ૨૩૦॥

યસ્ય નિત્યં મહાદેવે ભક્તિરવ્યભિચારિણી ।
તસ્યૈવ જન્મ સફલં જીવિતં ચ સુજીવિતમ્ ॥ ૨૩૧॥

તસ્યૈવ જનની ધન્યા તસ્યૈવ કુલમુત્તમમ્ ।
યસ્ય નિત્યં મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૨૩૨॥

તસ્યૈવ જનકો ધન્યો ધન્યસ્તસ્ય પિતામહઃ ।
યસ્ય નિત્યં મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૨૩૩॥

તસ્યૈવારોગ્યમનિશં આયુર્વૃદ્ધિઃ ક્ષણે ક્ષણે ।
યસ્ય નિત્યં મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૨૩૪॥

તસ્યૈવ ભાગ્યમુત્કૃષ્ટં તસ્યૈવ સકલોત્સવાઃ ।
યસ્ય નિત્યં મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૨૩૫॥

તસ્યૈવ વિમલં જ્ઞાનં તસ્યૈવ વિમલં મનઃ ।
યસ્ય નિત્યં મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૨૩૬॥

તસ્યૈવ વિમલં શીલં તસ્યૈવ વિમલં યશઃ ।
યસ્ય નિત્યં મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૨૩૭॥

અધીતવેદો બાલોઽપિ મૃત્યુઞ્જયમનામયમ્ ।
જપત્યયં મયામન્ત્રં પૂજયિત્વા સદાશિવમ્ ॥ ૨૩૮॥

મૃત્યુઞ્જયેન મન્ત્રેણ મૃણ્મયં લિઙ્ગમુત્તમમ્ ।
સમ્યગ્બિલ્વતરોર્મૂલે પૂજયત્યવલોકય ॥ ૨૩૯॥

યસ્તુ બિલ્વતરોર્મૂલે શુદ્ધો મૃત્યુઞ્જયં જપેત્ ।
તસ્ય મૃત્યુભયં નાસ્તિ સત્યં સત્યં મયોચ્યતે ॥ ૨૪૦॥

બિલ્વમૂલે મહાદેવં લિઙ્ગરૂપિણમાસ્તિકઃ ।
પૂજયત્યતિયત્નેન મૃત્યુપાશવિમુક્તયે ॥ ૨૪૧॥

સિધ્યન્તિ સમ્પદસ્તસ્ય બિલ્વમૂલે શિવાર્ચનાત્ ।
યસ્યાસ્ત્યનન્યગા ભક્તિર્મહાદેવે સુરોત્તમે ॥ ૨૪૨॥

શિવૈકશરણો યસ્તુ પૂજયિષ્યતિ શઙ્કરમ્ ।
સ એવ ભાગ્યવાઁલ્લોકે યોગ્યો મોક્ષશ્રિયોઽપિ ચ ॥ ૨૪૩॥

બિલ્વમૂલે બિલ્વપત્રૈઃ ક્ષીરપ્લુષ્ટૈરકલ્મષૈઃ ।
હુત્વા શૈવેન મનુના ગોલક્ષાધિપતિર્ભવેત્ ॥ ૨૪૪॥

બિલ્વમૂલે બિલ્વપત્રૈર્ઘૃતપ્લુષ્ટૈરખણ્ડિતૈઃ ।
હુત્વા શૈવેન મનુના લભન્તે સમ્પદોઽખિલાઃ ॥ ૨૪૫॥

પૂતો યો બિલ્વવૃક્ષાધઃ શૈવં યદિ મનું જપેત્ ।
તદા સ ગુરુસમ્પ્રાપ્તમન્ત્રસિદ્ધિં ચ વિન્દતિ ॥ ૨૪૬॥

અસ્યાપિ જનકઃ શુદ્ધો મહાશૈવોત્તમો યતઃ ।
તતસ્તદુપદિષ્ટશ્ચ મન્ત્રોઽસ્ય સફલો ધ્રુવમ્ ॥ ૨૪૭॥

જ્વલજ્જ્વલનસઙ્કાશં પશ્ય શૈવોત્તમાર્ભકમ્ ।
ઉદ્ધૂલનત્રિપૂણ્ડ્રાભ્યાં રુદ્રાક્ષૈરપિ ભૂષિતમ્ ॥ ૨૪૮॥

રુદ્રાક્ષકઙ્કણઃ સામ્બં લિઙ્ગરૂપિણમદ્વયમ્ ।
અભ્યર્ચયતિ પશ્યામું બિલ્વપત્રૈરખણ્ડિતૈઃ ॥ ૨૪૯॥

આબ્રહ્મકલ્પમેતસ્ય મૃત્યુર્નૈવ ભવિષ્યતિ ।
સિદ્ધમૃત્યુઞ્જયમનોરસ્ય સ્યાન્મરણં કથમ્ ॥ ૨૫૦॥

યસ્ય મૃત્યુઞ્જયઃ સિદ્ધઃ સ ચ મૃત્યુઞ્જયઃ સ્વયમ્ ।
તસ્ય દૂરતરો મૃત્યુર્ધ્યાયતઃ કિમુતાપરે ॥ ૨૫૧॥

મૃત્યુઞ્જયતિ યો દેવઃ સ તુ મૃત્યુઞ્જયઃ સ્મૃતઃ ।
સ તુ શઙ્કર એવ સ્યાદનન્યસહશો ધ્રુવમ્ ॥ ૨૫૨॥

યે તુ મૃત્યુઞ્જયં નિત્યં પૂજયન્તિ જપન્તિ ચ ।
તેષાં મૃત્યુભયં નાસ્તિં સત્યં સત્યં ન સંશયઃ ॥ ૨૫૩॥

અયં શિવૈકશરણઃ શ્રીમૃત્યુઞ્જયજાપકઃ ।
કથં મૃત્યુવશં ગચ્છેદતિમૃત્યુરયં ધ્રુવમ્ ॥ ૨૫૪॥

બાલોઽપિ બલવાનેષ મૃત્યુઞ્જયજપાર્ચનાત્ ।
અતો ધિક્કરણં ચાસ્ય મયા કર્તું ન શક્યતે ॥ ૨૫૫॥

મૃત્યુઞ્જયમુપાશ્રિત્ય યો ધિક્કર્તું ન શક્યતે ।
સ કિં શાસયિતું શક્યો મૃત્યુઞ્જયપરાયણઃ ॥ ૨૫૬॥

યં મૃત્યુઞ્જયમાશ્રિત્ય સ્થિતોઽન્યૈઃ પૂજ્યતે સદા ।
સ કિં સ્પ્રષ્ટું ત્વયા શક્યો મૃત્યુઞ્જયપદાનુગઃ ॥ ૨૫૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ચિત્રગુપ્તપ્રોક્તં મૃત્યુઞ્જયમહિમાખ્યાનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૬ । ૧૮૧।૨-૧૯૯ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 16 . 181.2-199 ..

Encoded and proofread by Ruma Dewan

*Chitraguptaproktam Mrityunjayamahimakhyanam*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*